पक्षी भेको मनुष्यश्च एतेषां वदनाङ्कम् ।
नावां सुखे परिन्यस्य आदित्यादिदशा भुवाम् ॥
कलसो दर्पणश्चन्द्रश्चेदशानां महीभुजाम् ।
हंसः केकी शुकः सिंहो गजोऽहिर्व्याघ्रषट्-
पदौ ॥
आदित्यादिदशानातनौकोपरि परिन्यसेत् ॥*॥
नौकासु मणिविन्यासो विज्ञेयो नवदण्डवत् ।
मुक्तास्तवकैर्युक्ता नौका स्यात् सर्व्वतो भद्रा ।
तत्संख्या चेदथ रसवेदद्वयसम्मिता क्रमशः ॥
कनकादीनां माला जयमालेति गद्यते सद्भिः ।
ब्रह्मक्षत्रे द्वितये एकैके वैश्यशूद्रयोनौ ॥ * ॥
निर्गृहं सगृहं वाथ तत् सर्व्वं द्विविधं भवेत् ।
निर्गृहं पूर्व्वमुद्दिष्टं सगृहाणि यथा शृणु ॥
सगृहा त्रिविधा प्रोक्ता सर्व्वमध्याग्रमन्दिरा ।
सर्व्वतो मन्दिरं यत्र सा ज्ञेया सर्व्वमन्दिरा ॥
राज्ञां कोशाश्वनारीणां यानमत्र प्रशस्यते ।
मध्यतो मन्दिरं यत्र सा ज्ञेया मध्यमन्दिरा ॥
राज्ञां विलासयात्रादि वर्षासु च प्रशस्यते ।
अग्रतो मन्दिरं यत्र सा ज्ञेया त्वग्रमन्दिरा ॥
चिरप्रवासयात्रायां रणे काले घनात्यये ॥
मन्दिरमानं नौकाप्रसरत एवार्द्धभागतो न्यूनम् ।
भोजस्तु ।

दीर्घहस्तवसुषट्दिवाकरा-
नेकदिङ्नवमिता यथाक्रमम् ।
राजपञ्चभुजसम्मितोन्नति-
र्मन्दिरे तरिगते महीभुजाम् ॥

भास्करादिकदशा भुवां पुनर्धातुनिर्णयनमत्र नवदण्डवत् ॥
काष्ठजं धातुजञ्चेति मन्दिरं द्विविधं भवेत ।
काष्ठजं सुखसम्पत्त्यै विलासे धातुजं मतम् ॥
अत्र शय्यासनादीनां मन्थरोत्क्षोचयोरपि ।
अन्येषाञ्चैव मुनिभिर्निर्णयः पूर्व्ववन्मतः ॥
दिङ्मात्रमिदमुद्दिष्टं नौकालक्षणमग्रजम् ।
प्रधानेष्वेव नियमः अप्रधाने न निर्णयः ॥
लघुता दृढता चैव गामिताच्छिद्रता तथा ।
समतेति गुणोद्देशो नौकानां संप्रकाशितः ॥
एवं विचिन्त्य यो राजा नौकायानं करोति च ।
स चिरं सुखमाप्नोति विजयं समरे श्रियम् ॥
योऽज्ञानादन्यथा यानं नौकानां कुरुते नृपः ।
तस्यतानि विनश्यन्ति यशो वीर्य्यं बलं धनम् ॥”
इति निष्पदयानोद्देशे नौकायानम् ॥ * ॥
जघन्यजलयानानि यथा,—
“नौकान्यतो जले यानं जघन्यमिति गद्यते ।
तद्देहा बहवस्ते तु पाश्चात्यानां प्रकीर्त्तिताः ॥
द्रोणीरूपन्तु यद्यानं द्रोणीयानन्तदुच्यते ।
घटीभिर्घटितं यानं घटीनौकेति गद्यते ॥
तुम्बाद्यैस्तु फलैर्यानं फलयानं प्रचक्ष्यते ।
चर्म्मभिस्तूलपूर्णैश्चर्म्मयानं तदुच्यते ॥
यानं यल्लघुभिर्वृक्षैर्वृक्षयानन्तदुच्यते ।
जन्तुभिः सलिले यानं जन्तुयानं प्रचक्ष्यते ॥
बाहुभ्यां सन्तरेद्वारि जघन्येषु न निर्णयः ॥”
इति युक्तिकल्पतरौ निष्पदयानोद्देशः ॥

नौकादण्डः, पुं, (नौकायाः परिचालनार्थं यो दण्डः ।) क्षेपणी । इत्यमरः ।१।१०।१३॥ चाहड़ इति ध्वणी इति नगी इति च भाषा ॥

नौतार्य्यं, त्रि, (नावा नौकया तार्य्यं तरणीयम् ।) नाव्यम् । नौकागम्यदेशादि । इत्यमरः ।१।१०।१०।

न्यकारका, स्त्री, (न्यक् क्रियतेऽसौ पृषोदरात् कलोपे साधुः ।) शकृत्कीटः । विष्ठाकृमिः । इति हारावली । १६३ ॥ (क्वचित् न्यक्कारका इति पाठः ॥)

न्यकारः, पुं, (न्यक् क्रियते इति । कृ + घञ् ।) न्यक्करणम् । तत्पर्य्यायः । अवज्ञा २ परीहारः ३ परिहारः ४ पराभवः ५ अपमानम् ६ परिभवः ७ तिरस्कारः ८ तिरस्क्रिया ९ अवहेला १० हेला ११ अवहेलनम् १२ हेलनम् १३ अनादरः १४ अभिभवः १५ धर्षणं १६ धर्षणम् १७ रीढ़ा १८ अभिभूतिः १९ निकृतिः २० असूक्षणम् २१ अस्कन्दनम् २२ नीकारः २३ अवहेलम् २४ अमाननम् २५ क्षेपः २६ निकारः २७ धिक्कारः २८ । इति शब्दरत्नावली ॥ विमानना । इति कालिदासः ॥ (यथा, महानाटके । ९ । १४ ।
“न्यकारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ॥”)

न्यचं, क्ली, कार्त्स्न्यम् । द्वयम् । निकृष्टे, त्रि । इति मेदिनी । चे, १६ ॥

न्यचः, पुं, (नीयते अचिणी यस्य । षच् समासे।) महिषः । इति मेदिनी । चे, १६ ॥ जामदग्न्यः ॥ इति हेमचन्द्रः ॥

न्यग्रोधः, पुं, (न्यक् रुणद्धि इति । रुध + अच् ।) वटवृक्षः । (यथा, भागवते । ४ । ६ । १६ ।
“पनसोडुम्बराश्वत्थप्लक्षन्यग्रोधहिङ्गुभिः ॥”)
व्यामपरिमाणम् । इत्यमरः । २ । ४ । ३२, ३।३।९५ ॥ शमीवृक्षः । इति मेदिनी । धे, ३२ ॥ विषपर्णी । मोहनाख्यौषधिः । इति विश्वः ॥ (उग्रसेननृपपुत्राणामन्यतमः । यथा, हरिवंशे । ३७ । ३० ।
“नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्व्वजः ।
न्यग्रोधश्च सुनामा च कङ्कः शङ्कुः सुभूमिपः ॥”)

न्यग्रोधपरिमण्डलः, पुं, (न्यग्रोधः व्यामः परिमण्डलं परिणाहो यस्य ।) व्यामपरिमितोच्छ्रयपरीणाहः पुरुषः । एतादृशाः पुरुषास्त्रेतायुगे चक्रवर्त्तिन आसन् । यथा, मात्स्ये ११८ अः ।
“महाधनुर्धराश्चैव त्रेतायां चक्रवर्त्तिनः ।
सर्व्वलक्षणसम्पन्ना न्यग्रोधपरिमण्डलाः ॥
न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्यग्रोध उच्यते ।
व्यामेन उच्छ्रयो यस्य अध ऊर्द्ध्वञ्च देहिनः ।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः ॥”
(अपिच । भट्टिटीकायां भरतमल्लिकधृतामिपुराणवचनम् ।
“प्रसारितभुजस्येह मध्यभागद्वयान्तरम् ।
उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डलः ॥”)

न्यग्रोधपरिमण्डला, स्त्री, (न्यक् रुणद्धि इति न्यग्रोधं अधःप्रसृतं परितो मण्डलं नितम्बमण्डलं यस्याः । यद्वा न्यग्रोधस्य वटस्य इव परिमण्डलं परिणाहो नितम्बभागे यस्याः ।) अङ्गनाविशेषः । यथा,—
”स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये क्षीणा भवेद्या सा न्यग्रोधपरिमण्डला ॥”
इति शब्दमाला ॥
(तथाच भट्टिः । ५ । १८ ।
“योषिद्वृन्दारिका तस्य दयिता हंसनादिनी ।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥”)

न्यग्रोधा, स्त्री, (न्यक् रुणद्धीति । रुध् + अच् । टाप् ।) न्यग्रोधी । इति शब्दरत्नावली ॥ (पर्य्यायोऽस्या यथा,—
“दन्त्युडुम्बरपर्णी स्यान्निकुम्भोऽथ मकूलकः ।
द्रवन्ती नामतश्चित्रा न्यग्रोधा मूषिकाह्वया ॥”
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

न्यग्रोधी, स्त्री, (न्यक् रुणद्धीति । रुध् + अच् । गौरादित्वात् ङीष् इति प्राञ्चः ।) उपचित्रा । इत्यमरभरतौ ॥ इन्दुरकानी इति भाषा । धुलकुँड़ी इति केचित् ।

न्यङ्, [च्] त्रि, (नितरामञ्चतीति । अञ्चु + क्विप् ।) नीचः । खर्व्वः इत्यमरः । ३ । १ । १० ॥ निम्नः । इति मेदिनी । चे, ५६ ॥ कार्त्स्न्यम् । इति विश्वः ॥

न्यङ्कुः, पुं, (नितरां अञ्चति गच्छतीति । अञ्चु गतौ + “नावञ्चेः ।” उणां । १ । १८ । इति उः । “न्यङ्कादीनाञ्च ।” ७ । ३ । ५३ । इति कुत्वम् ।) मृगभेदः । इत्यमरः । २ । ५ । १० ॥ (यथा, हरिवंशे । १२१ । ४९ ।
“न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितम् ॥”)
मुनिविशेषः । इति मेदिनी । के, २७ ॥

न्यङ्कुभूरुहः, पुं, (न्यङ्कुरिव भूरुहः ।) शोणकवृक्षः । इति त्रिकाण्डशेषः ॥ (शोणकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

न्यच्छं, क्ली, (नितरामच्छम् ।) क्षुद्ररोगविशेषः । मेचेता इति भाषा ॥ तल्लक्षणं यथा,—
“मण्डलं महदल्पं वा श्यावं वा यदि वा सितम् ।
सहजं नीरुजं गात्रे न्यच्छं तदभिधीयते ॥”
तच्चिकित्सा यथा,---
“शिरावेधैः प्रलेपैश्च तथाभ्यङ्गैरुपाचरेत् ।
न्यच्छं लिम्पेत् पयःपिष्टैः कल्कैः क्षीरितरूद्भवैः॥
त्रिभुवनविजयापत्रं मूलं स्थविरस्य शिंशपा बीजैः ।
उद्वर्त्तनं विरचितं न्यच्छव्यङ्गापहं सिद्धम् ॥
स्थविरस्य वृद्धदारोः ।” इति भावप्रकाशः ॥

न्यचितं, त्रि, (नि + अच + णिच् + क्तः ।) अधःक्षिप्तम् । इति जटाधरः ॥

न्ययः, पुं, (नि + इ + “एरच् ।” ३ । ३ । ५६ इत्यच् ।) अपचयः । इति केचित् ॥

न्यस्तं, त्रि, (नि + अस + क्त ।) निहितम् । स्थापितम् । तत्पर्य्यायः । निसृष्टम् २ । इत्य